श्री दुर्गा स्तोत्रं (युधिष्ठिर कृतं)

श्री दुर्गा स्तोत्रं (युधिष्ठिर कृतं)

विराटनगरं रम्यं गच्छमानो युधिष्ठिरः |
अस्तुवन्मनसा देवीं दुर्गां त्रिभुवनेश्वरीं || 1 ||

यशोदागर्भसंभूतां नारायणवरप्रियां |
नंदगोपकुले जातां मंगळ्यां कुलवर्धिनीं || 2 ||

कंसविद्रावणकरीमसुराणां क्षयंकरीं |
शिलातटविनिक्षिप्तामाकाशं प्रति गामिनीं || 3 ||

वासुदेवस्य भगिनीं दिव्यमाल्यविभूषितां |
दिव्यांबरधरां देवीं खड्गखेटकधारिणीं || 4 ||

भारावतरणे पुण्ये ये स्मरंति सदाशिवां |
तान् वै तारयते पापात् पंके गामिव दुर्बलां || 5 ||

स्तोतुं प्रचक्रमे भूयो विविधैः स्तोत्रसंभवैः |
आमंत्र्य दर्शनाकांक्षी राजा देवीं सहानुजः || 6 ||

नमोऽस्तु वरदे कृष्णे कुमारि ब्रह्मचारिणि |
बालार्कसदृशाकारे पूर्णचंद्रनिभानने || 7 ||

चतुर्भुजे चतुर्वक्त्रे पीनश्रोणिपयोधरे |
मयूरपिच्छवलये केयूरांगदधारिणि || 8 ||

भासि देवि यथा पद्मा नारायणपरिग्रहः |
स्वरूपं ब्रह्मचर्यं च विशदं तव खेचरि || 9 ||

कृष्णच्छविसमा कृष्णा संकर्षणसमानना |
बिभ्रती विपुलौ बाहू शक्रध्वजसमुच्छ्रयौ || 10 ||

पात्री च पंकजी घंटी स्त्रीविशुद्धा च या भुवि |
पाशं धनुर्महाचक्रं विविधान्यायुधानि च || 11 ||

कुंडलाभ्यां सुपूर्णाभ्यां कर्णाभ्यां च विभूषिता |
चंद्रविस्पर्धिना देवि मुखेन त्वं विराजसे || 12 ||

मुकुटेन विचित्रेण केशबंधेन शोभिना |
भुजंगाभोगवासेन श्रोणिसूत्रेण राजता || 13 ||

विभ्राजसे चाबद्धेन भोगेनेवेह मंदरः |
ध्वजेन शिखिपिच्छानामुच्छ्रितेन विराजसे || 14 ||

कौमारं व्रतमास्थाय त्रिदिवं पावितं त्वया |
तेन त्वं स्तूयसे देवि त्रिदशैः पूज्यसेऽपि च || 15 ||

त्रैलोक्यरक्षणार्थाय महिषासुरनाशिनि |
प्रसन्ना मे सुरश्रेष्ठे दयां कुरु शिवा भव || 16 ||

जया त्वं विजया चैव संग्रामे च जयप्रदा |
ममापि विजयं देहि वरदा त्वं च सांप्रतं || 17 ||

विंध्ये चैव नगश्रेष्ठे तव स्थानं हि शाश्वतं |
काळि काळि महाकाळि शीधुमांसपशुप्रिये || 18 ||

कृतानुयात्रा भूतैस्त्वं वरदा कामचारिणी |
भारावतारे ये च त्वां संस्मरिष्यंति मानवाः || 19 ||

प्रणमंति च ये त्वां हि प्रभाते तु नरा भुवि |
न तेषां दुर्लभं किंचित् पुत्रतो धनतोऽपि वा || 20 ||

दुर्गात् तारयसे दुर्गे तत् त्वं दुर्गा स्मृता जनैः |
कांतारेष्ववसन्नानां मग्नानां च महार्णवे |
दस्युभिर्वा निरुद्धानां त्वं गतिः परमा नृणां || 21 ||

जलप्रतरणे चैव कांतारेष्वटवीषु च |
ये स्मरंति महादेवि न च सीदंति ते नराः || 22 ||

त्वं कीर्तिः श्रीर्धृतिः सिद्धिर्ह्रीर्विद्या संततिर्मतिः |
संध्या रात्रिः प्रभा निद्रा ज्योत्स्ना कांतिः क्षमा दया || 23 ||

नृणां च बंधनं मोहं पुत्रनाशं धनक्षयं |
व्याधिं मृत्युं भयं चैव पूजिता नाशयिष्यसि || 24 ||

सोऽहं राज्यात्परिभ्रष्टः शरणं त्वां प्रपन्नवान् |
प्रणतश्च यथा मूर्ध्ना तव देवि सुरेश्वरि || 25 ||

त्राहि मां पद्मपत्राक्षि सत्ये सत्या भवस्व नः |
शरणं भव मे दुर्गे शरण्ये भक्तवत्सले || 26 ||

एवं स्तुता हि सा देवी दर्शयामास पांडवं |
उपगम्य तु राजानामिदं वचनमब्रवीत् || 27 ||

देव्युवाच |
शृणु राजन् महाबाहो मदीयं वचनं प्रभो |
भविष्यत्यचिरादेव संग्रामे विजयस्तव || 28 ||

मम प्रसादान्निर्जित्य हत्वा कौरववाहिनीं |
राज्यं निष्कंटकं कृत्वा भोक्ष्यसे मेदिनीं पुनः || 29 ||

भात्रृभिः सहितो राजन् प्रीतिं प्राप्स्यसि पुष्कलां |
मत्प्रसादाच्च ते सौख्यमारोग्यं च भविष्यति || 30 ||

ये च संकीर्तयिष्यंति लोके विगतकल्मषाः |
तेषां तुष्टा प्रदास्यामि राज्यमायुर्वपुः सुतं || 31 ||

प्रवासे नगरे चापि संग्रामे शत्रुसंकटे |
अटव्यां दुर्गकांतारे सागरे गहने गिरौ || 32 ||

ये स्मरिष्यंति मां राजन् यथाऽहं भवता स्मृता |
न तेषां दुर्लभं किंचिदस्मिल्लोके भविष्यति || 33 ||

इदं स्तोत्रवरं भक्त्या शृणुयाद्वा पठेत वा |
तस्य सर्वाणि कार्याणि सिद्धिं यास्यंति पांडवाः || 34 ||

मत्प्रसादाच्च वः सर्वान्विराटनगरे स्थितान् |
न प्रज्ञास्यंति कुरवो नरा वा तन्निवासिनः || 35 ||

इत्युक्त्वा वरदा देवी युधिष्ठिरमरिंदमं |
रक्षां कृत्वा च पांडूनां तत्रैवांतरधीयत || 36 ||

इति श्रीमन्महाभारते विराटपर्वणि अष्टमोऽध्याये युधिष्ठिर कृत श्री दुर्गा स्तोत्रं |